National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 37-39
© 2026 NJHSR
www.sanskritarticle.com

**डा. आशुतोष कुमार झा**
सहाचार्यः (ज्योतिषम्)
श्रीरामसुन्दरसंस्कृतविश्व-
विद्याप्रतिष्ठानम्,
(आदर्श संस्कृत महाविद्यालयः),
रमौली, दरभंगा, बिहार

**Correspondence:**
**डा. आशुतोष कुमार झा**
सहाचार्यः (ज्योतिषम्)
श्रीरामसुन्दरसंस्कृतविश्व-
विद्याप्रतिष्ठानम्,
(आदर्श संस्कृत महाविद्यालयः),
रमौली, दरभंगा, बिहार

# शुभशकुनविमर्शः

**डा. आशुतोष कुमार झा**

तत्रादौ शुभदिनतिथिनक्षत्रायोगलग्नचन्द्रताराद्यनुकूलकाले सम्प्राप्ते सति अनुकूल समये कृता यात्रा शुभशकुनवशेन विशेषरुपेण शुभपफलदा स्यात्। तेन यात्राकाले कार्यारम्भकाले वा शकुनमवश्यं विचारणीयम्। मूलशकुनं यात्राप्रारम्भकाले विचारयेत्। यात्रा·ऽरम्भदिवसे प्रातःकाले शकुनं विमर्शेत्। गृहादिप्रवेशकालिकशकुनमपि विचारणीयम्। सर्वेषु कार्येषु क्षुतं अकल्याणकरं जायते। प्रस्थानात् क्रोशाभ्यन्तरे शकुनं पफलदायकं जायते। क्रोशादनन्तरं निष्पफलं भवति। अर्थात्क्रोशानन्तरं शकुनस्य विचारो नैव करणीयः। यतो हि क्रोशादनन्तरं शकुनं निष्पफलं भवति। अतो क्रोशाभ्यन्तरमेव शकुनं विचारणीयम्। एतत् प्रसङ्.गे ज्योतिषशास्त्राविशारदेन इदमुक्तं विद्यते यत्-

**“यात्राचन्द्रबले कार्या शकुनश्च विचारयेत्।”**[1]

अनेन शकुनस्य विमर्शं प्रति महत्वमुत्पद्यते। एतत्प्रसंगे दैवज्ञवरेण्यैः श्रीकालिदासमहोदयैः शकुनस्य महत्त्वं एवं प्रतिपादितम्-

**“उदीरिता नेहसि योगयात्रायात्राविधेयोक्त मुहूर्त्तकालाः।**

**सैवोत्तमा स्याच्छकुनैरतो·हं ब्रुवे मुहूर्त्ताञ्छकुनाननेकान् ।।”**[2]

सुदिनतिथिनक्षत्राचन्द्रतारालग्नाद्यनुकूले सत्यपि यदि निन्द्यानि शकुनानि लभ्यन्ते तदा यात्रा निषिद्धैव बोध्या। एवमेव वशिष्ठेनोक्तम्-

**“अशुभानि निमित्तानिउत्पातशकुनानि च। यात्राकाले नृणां तेषां निध्नायाध्नाय वा ।।”**

अतो शकुनविचारं परमावश्यकम् विद्यते। तत्रा शकुनं द्विविधम्- शुभशकुनमशुभशकुञ्चेति। शुभशकुनं कार्यसिद्धिं प्रयच्छति। अशुभशकुनञ्च कार्यविनाशस्य सूचकं भवति।अशुभशकुने समागते सति तत्काल कार्यविरामं करणीयम्। कालान्तरे शुभशकुने सम्प्राप्ते सति कार्यारम्भं करणीयम्। येन कार्यस्य सिद्धिर्जायते। वस्तुतः शकुनस्य विचारः यात्राकाले अपेक्षितो जायते अथवा कार्यारम्भकाले। यात्रा··रम्भकाले शुभशकुने सम्प्राप्ते सति यत्कार्यं अभिप्रेत्य यात्रा क्रियते तत्कार्यसिद्धिर्जायते इति बोध्यते। कार्यारम्भकाले शुभशकुने सम्प्राप्ते सति तत्कार्यसिद्धिर्भवति। अपशकुने समागते सति कार्यविनाशः बोध्यः।

गमनारम्भसमये कोकिला-सूकरी-पोतकी-रला-छुच्छुन्दरी-श्रृगाली-कपोत-खञ्जन-तितिर-हंसादयः यदि गमनकर्त्तृणां वामभागे अवलोकयेयुस्तदा मंगलकारी भवति। यदि गमनारम्भकाले मृगी, छक्करः, भासः, श्रीकण्ठः, नीलकण्ठः, काकः, रीछः, श्वानः, वानराश्च गमनकर्त्तुः कार्यारम्भकर्त्तुर्वा दक्षिणभागे तिष्ठेयु-स्तदा कार्य सिद्धिप्रदः बोध्यः। उक्तश्चास्मिन् प्रसङ्.गे श्रीमद्रामाचार्येण-

**“वामाङ्.गे कोकिला पल्ली पोतकी सूकरी रला ।**
**पिङ्.गला छुच्छुका श्रेष्ठाः शिवाः पुरुषसंज्ञिता ।।**
**छिक्करः पिक्को भास श्रीकण्ठो वानरो रुरुः।**
**स्त्रीसञ्ज्ञकाः काकऋक्षश्वानः स्युर्दक्षिणाः शुभाः ।।”**[3]

अपि च वराहमिहिरेण-

**"छुछुन्दरी शूकरिकाशिवा च श्यामारला पिड्.गलिकाऽन्यपुष्टा।**

**वामा प्रशस्ता गृहगोधिका च पुंसंज्ञका ये च पतत्रिणः स्युः।।"[4]**

गमनारम्भकाले गमनकर्त्तुः दक्षिणभागे रुरुरहितो मृगविशेषाः पक्षिणः शुभफलदाः भवन्ति। परन्तु विषमसंख्यकाः मृगाः यदि पश्येयुस्तदा अतिकल्याणकारिणः जायन्ते। गमनारम्भसमये वामभागस्थे गर्दभस्वरायते तदा कल्याणकारी भवति। दधि-धृत-फल-मत्स्य- मधु -गोरोचन-कमल-दर्पण-दुग्ध्-अन्न-मुकुट-सजल-कलश-वीणा- पुष्प-श्वेतान्न-छत्र-शड्.ख -अस्त्र -अञ्जन-प्रज्वलिताग्नि -शिविका-गज-अश्व-वृषभ-कन्या वा यदि यात्रा काले गन्तुः दक्षिणेभागे अवलोकयेत्तदा इयं यात्रा विशिष्टपफलदायी भवति। कुश-पीतसर्षप-अक्षततण्डुल-अजा-शुभमृत्तिका-वेश्या-रत्न-सिंहासन-नकुल-गौ- आभूषण-मयूर-मूषक-विप्र-भारद्वाजपक्षी-ईक्षु-राजानो वा यदि गमनकर्त्तुः दक्षिणभागे तिष्ठेत्तदा कल्याणकरीयात्रा जायते। उक्तञ्च-

**'दधिधृतफलमीन-**
**क्षौद्रगोरोचनाब्जध्वजमुकुरपयोन्नोष्णीषभृड्.गारवीणाः।**
**कुसुमधवलधान्यच्छत्र**
**शड्.खाञ्जनास्त्रज्वलदनलनृयानेभाश्वशुक्लोऽक्षकन्या।।"[5]**

यदि गन्तुः दक्षिणभागे दूर्वा-शुष्कगोमय-अंकुश-दीपक-औषधि-समिधा-धौताम्बर- बहुपुत्रादिपरिजनयुतो जनः बद्धैकपशवो वा यदि स्युस्तदा इयं यात्रा मंगलमयी भवति।

मृदड्.गभेरीश्रीवाद्य(शंड्.ख) ध्वनिवेदमन्त्रोच्चार –

मांगलिकगीतध्वनि घोषवती आनक(नगाड़ा) वेणुशब्दान् श्रुत्वा कृता यात्रा श्रीवृद्धिदा जायते। श्वेतवस्त्राभूषण –

पूर्णकलशवाद्यध्वनिपुत्रावान्पुरुष
शड्.खदर्पणाश्वगजगौसुभगास्त्रीश्वेतपुष्प
धुपदीपसुगन्धितद्रव्यश्वेतवृषवेश्याछत्रावितान
(समियाना)चामरमीनकुमारीकन्या गोरोचनानि एतानि वस्तूनि यात्राकाले अवलोकयेत्तदा अभीष्टपफलदायको जायते। उक्तञ्च ग्रन्थे-

**"वस्त्रालड्.करणानि पूर्णकलशस्तौर्यध्वनिः पुत्रावान् शड्.खादर्श-नृपाश्वदन्तिसुरभिस्त्रीपुष्पधन्यादि च।**
**दोलादीपविधूमर्वार्सिव्याणि शुभ्रो वृषो वेश्याछत्रावितानचामर-कुमार्यो मीनगोरोचने।।"[6]**

यद् वस्तु स्वान्तनितान्ततोषकरणं मनः प्रसन्नकारकं तत् शुभशकुनं बोध्यम्। पृथ्व्यिा निस्सारितं गोमयं, मृत्तिका, जलपूर्णघटं, जलाहरणार्थं रिक्तोऽपिघटं, प्रक्षालितवस्त्रासहितो रजकः, दूर्वा, कुशः,मासं, शोणितं, मदिरा, ब्रह्मचारी, गुरुः, विप्रः, दैवविद्, मित्रां, मृगः,रोदनरहितं शवं, दधि, घृतं, दुग्धं, मधु, सर्षपञ्चैतानि यात्राकाले शुभाय भवति। एतेषां वस्तूनां दर्शनं, श्रवणं, स्पर्शं, पठनञ्च कल्याणकरी जायते।यात्राकाले क्रोशाभ्यन्तरे अग्रे दक्षिणे वा पाश्र्वे सवत्सागौः, वृषः, गजः, अश्वः, दक्षिणावर्त्तवह्निः, पूर्णकुम्भः, ब्राह्मः, दीव्यस्त्री,गणिका, श्वेतपुष्पाणां माला, पताका, मत्स्यः, मांसं, दधि, मधु, काञ्चनं, शुक्लवस्त्राणि दृष्टवा, स्पृष्टवा पठित्वा वा गन्तुकामो जनः यदि गमनं करोति तदा कार्यसिद्धिं प्राप्नोति। उक्तञ्च-

**"अग्रेधेनुः सवत्सा वृषगजतुरगा दक्षिणावर्त्तवह्निः दीव्यस्त्री पूर्णकुम्भो द्विजवरगणिका श्वेतमाला पताका मत्स्यो मांसं दधिमधुसहितं काञ्चनं शुक्लवस्त्रां दृष्टवा स्पृष्ट्वा पठित्वा वा फलमिह लभते मानवो गन्तुकामः।।"[7]**

कपोती, शुकरी, शिवा, क्रौञ्ची, छुछुन्दरी, भैरवीपक्षी, गृहगोधिकाः (छिपकलीद्) गमनकर्त्तुः वामभागे सन्दृष्टे सति कल्याणकारी जायते। भासपक्षीविशेषः, मृगः, छिक्करः (मृगविशेषःद्), भल्लूकः, श्रीकण्ठः, वानरः, सारसपक्षी गन्तुः दक्षिणभागे अवलोकिते सति शुभकरी स्यात्। उक्तञ्च-

**"रलाबलाशूकरिका शिवा पिका कपोतकी क्रौञ्च्यनुगन्धमूषिका।**
**स्यात्पिड्.गला वासकगोधिका सदा यियासतां वामविभागगा वरा।।"[8]**

उल्लूकः, काकः, कपोतः, श्रृगालः, वाध्रीणसः(गेंडा), रासभाश्च एते गमनकर्त्तुः प्रस्थानकाले वामभागे शुभसूचकाः भवन्ति तथा आगमनकाले दक्षिणभागे समालोकिते सति शुभसूचकाः भवन्ति। यदि विषमसंख्यकाः वन्य जीवाः प्रयाणकाले गन्तुः दक्षिणभागे समालोकयेयुस्तदा यात्राजन्यसमस्तकार्याणि सिद्धयन्ति। कथितञ्च–

**"शस्ता यदा यान्ति वनौकसो मृगास्तदौजसंख्यानुमिताः प्रदक्षिणम्।**
**गमे गमो यानकृतामुताड्.गिनामशेषयानाखिलभेद सिद्धये।।"[9]**

यात्रा काले सम्मुखे दक्षिणे वा स्थाने सुखेन निवसन्ती पोतकी, पोतक्याः मिथुनं, नृत्यं, वेगपुरस्परं चञ्च्वोः शुभनादः जलेषु विलासः, क्रीडनकं एताः चेष्टाः युताः दृष्टिगोचराः स्युस्तदा शुभफलसूचकाः जायन्ते। यदि वामभागे शब्दायमाना पोतकी पत्रोषु क्रीडारता शोभनशालवृक्षेषु आरोहितवती, शोभनाचेष्टायुता च स्यात्तदा अत्यन्तशुभपफल सूचिका भवति। उक्तञ्च-

**"शान्ताश्रयो मिथुनताण्डवभक्ष्य चञ्चुतारप्रयाणयमदिग्रव-वार्विलासाः।**
**वामस्वनच्छदविलास सुशालरोहाः श्यामाविचेष्टितमिहाभिमुखीति रम्यम्।।"[10]**

वेद-वेदाड्.।नां पाठं कुर्वन् दुन्दुभिशड्.खध्वनिः श्रृण्वन्, पुराणस्मृ-त्यादिग्रन्थानां पारायणं कुर्वन् कृता यात्रा मंगलाय भवति। यात्राकाले सारस-चाष-मयूर-हंस-चकवा-पड्.केन संलिप्तसूकरस्य पृष्ठोपरि उपविष्टः काकः, लघ्वाकारो विल्ववृक्षः व्यजनः श्रीखण्डचन्दनादीनां दर्शनं शोभनम्। प्रयाणकाले सवत्सागौः, अजः,

वीजपुरः(नीम्बू), प्रियङ्.गुः लाजा,रथारुढोजनः,पताका, वैजयन्ती, सवौषधिः, स्वस्तिकपूर्णपात्राणि, घोटकः, दूर्वा, तात्कालिक गोमयानि चैतानि वस्तूनि प्रस्थानकाले दृष्टिगोचरे सति कल्याणकारी भवति। जलाप्लावितडागः, ब्रह्मा-विष्णु-महेश-इन्द्र-पर्वत- गजादीनां दर्शनेन यात्रा सिद्धकरी जायते। सर्षप-सर्प-दर्पण-अञ्जन-वद्धैकपशु-मत्स्य-मांसपूर्णपात्रा-उष्णीष- स्वर्णपात्रा -दम्पति समन्वितो जन पुंयान-वीणा-तपस्वी इत्यादीनां दर्शनं प्रस्थानकाले मङ्.गलानि कुर्वन्ति। दधि-मधु- घृत-गारोचन-कुमारीकन्या-ध्वजा-पताका-स्वर्णाभूषण-पद्दम-पुष्प-सिंहासन-श्वेतवृषभ- श्वेतपुष्प-श्वेतवस्त्रा-विप्र- सिद्धपुरुषः, वस्त्राभूषणालंकृता ललना पुरुषो वा, यात्राकाले अवलोकयेत्तदा अभीष्टसिद्धकरी भवति यात्रा । उक्तञ्च-

**"दधिमधुघृतरोचना कुमारी ध्वजकनकाम्बुजभद्रपीठशङ्.खाः।**
**सितवृषकुसुमाम्बराणि मीनद्विजगणिकाप्तजनाश्च चारुवेषाः ।।"[11]**

गमनकाले प्रज्वलिताग्निः, आम्रफलम्, अक्षतेक्षुः, भक्ष्यवस्तूनि, गजः, मृत्तिका, अङ्.कुशः, छत्रां, चामरो, अस्त्रां, शस्त्रां, मणिः, रत्नानि वा यदि दर्शयेत्तदा कल्याणाय भवति। भारद्वाजपक्षी, अजः, मयूरः, नीलकण्ठपक्षी, नकुलः एतेषां दर्शनं शब्दश्रवणं वा प्रस्थानकालात् क्रोशाभ्यन्तरे भवेत्तदा इयं यात्रा अतिकल्याणकारी जायते। नकुलमृगपक्षीनां गमनं यदि गन्तुः सम्मुखे वामभागात् दक्षिणभागे स्युस्तदा कल्याणकरी भवति। अपराह्नकाले चाषनकुलौ यदि गन्तुः वामभागे गच्छेतान्तदा शुभपफलदौ स्तः। मृगवनकुक्कुरशतपत्राः सायंकाले यदि गन्तुः दक्षिणभागं प्रति गच्छेयुस्तदा शुभपफलानि प्रच्छन्ति।

नष्टवस्तूनां प्राप्तिः आत्मीयजनानां समागमनं, युद्धादिकार्यं, गृहप्रवेशः, राजदर्शनादिकार्येषु गमनोक्तानुकूल शकुनाद्विपरीते सति शुभप्रदम् भवति। यथा शुभशकुनोक्तदशायां शुभानि पफलानि, अशुभशकुने सम्प्राप्ते सति अशुभानि पफलानि लभ्यन्ते। उक्तञ्च-

**"चाषो नकुलश्च वामगौ दिवसार्धात्परतः शुभप्रदौ।मृगवच्च वनेषु कुक्कुराः शतपत्रेऽस्तसमये च दक्षिणः।।"[12]**

यदि गमनकाले शुभशकुनसम्प्राप्तानन्तरं गन्तुः सम्मुखे भग्नः खण्डितः वृक्षः भस्मास्थितुषाकुलेषु श्मशानभूमिः, यष्टिकण्टकादिनिर्मित-विषमाकृतियुतं गृहं स्यात्तदा शुभशकुनोऽप्यशुभकारको जायते। यद्यपि यात्रकाले रिक्तघटस्य दर्शनमशोभनं बुध्यते किन्तु घटो यदि जलाभरणार्थं अस्ति अर्थात् जलाभरणाय यदि घटं नीत्वा कश्चित् गच्छति तदा रिक्तघटस्य दर्शनमपि कल्याणकारकम् भवति। छात्रणां, चौरकर्मसमुद्यतानां, वणिजानाञ्च दर्शनमतीव शोभनम् जायते। उक्तञ्च शास्त्रे-

**"रिक्तोऽनुकूलोकलशो जलार्थमभ्युद्यतः सिद्धिकरः प्रयाणे।**
**विद्यार्थिनां चौर्यसमुद्यतानां वणिक्क्रियाभ्युद्यमिनामतीव ।।"[13]**

पूर्वस्यां दिशि श्वेतस्वच्छवस्त्रणि घोटकः, दक्षिणस्यां दिशि शवः,पश्चिमस्यां दिशि कुमारी कन्या दधि, उत्तरस्यां दिशि गौविप्रसाधुजनानां दर्शनं यात्राकाले शोभनफलदायकम् भवति। यात्राकाले वामभागे पूर्वस्यां च पूर्णकूटपक्षी (कराहिका),काकः, दक्षिणस्यां दिशि वामभागे च शोभनं फलम् प्रयच्छति। यात्राकाले छिक्काश्रवणफलविचारोकर्त्तव्यः। यदि गमनसमयेऽथवा कश्चित् नूतनकार्यारम्भकाले गमनकर्त्तुराग्नेयकोणे यदि छिक्का भवति तदा शोककारकः। यदि नैऋत्र्यकोणे छिक्का भवति तदा प्रियजनानां वस्तूनां दर्शनं बोध्यम्। पश्चिमदिशायां छिक्का यदि जायते तदा मिष्टान्नभोजनं कथयते। वायव्यकोणे छिक्का भवति तदा धनलाभदायको भवति। ईशानकोणे छिक्का यदि जायते तदा कल्याणकारीणि फलानि प्रयच्छन्ति। छिक्कायामाध्यमेन शकुन विचारः कर्त्तव्यः। अशुभफलदिशि यदि दिक्का जायते तदा किञ्चिद् विरम्य स्तोत्रदीनां पाठं कृत्वा पुनः कार्यारम्भं करणीयम्।

**सन्दर्भग्रन्थाः**

[1]शिशुबोधे-श्लोके-627
[2]ज्योतिर्विदाभरणे- 11/86
[3]मुहूर्त्तचिन्तामणौ- 11/105-6
[4]योगयात्रायाम् - 14/01
[5]ज्योतिर्विदाभरणे- 11/95
[6]मुहूर्त्तमार्तण्डे- 7/15
[7]शिशुबोधे-22(पृष्ठे)
[8]ज्योतिर्विदाभरणे- 11/99
[9]ज्योतिर्विदाभरणे- 11/102
[10]ज्योतिर्विदाभरणे- 11/112
[11]योगयात्रयाम्- 13/11
[12]योगयात्रायाम्- 14/6
[13]योगयात्रायाम् - 14/14